सुखदुःखाभावरूपत्वाभावादिति चेन्न हि।
अथशब्दोऽत्राधिकारिविशेषणतया स्थितः ॥३९॥
मोक्षः संबध्यते यस्मात्फलत्वेनाथ मोचने।
विशेषणत्वकाम्यत्वपक्षाभ्यां फलता न हि ॥४०॥
जीवनागारदेहादेरपि तत्त्वप्रसंगतः।
प्रायश्चित्ते परस्त्रीणामपि तत्त्वप्रसंगतः ॥४१॥
उच्यते काम्यतायां तद्विधिबोध्यैकसाध्यता।
प्रयोजिका फलत्वे हि तस्मात्सुष्ठूक्तमार्थिकम् ॥४२॥
इति श्रीमद्वल्लभाचार्यविरचिताः पूर्वमीमांसाकारिकाः संपूर्णाः।

# अथ श्रीभगवत्पीठिका।

श्रीकृष्णाय नमः।

श्रीपुरुषोत्तमस्य त्रीणि स्वरूपाणि—एकम् आधिभौतिकं, द्वितीयम् आध्यात्मिकं, तृतीयम् आधिदैविकम्। आधिभौतिको नारायणो लक्ष्मीपतिः। तत्क्षरःस्वरूपम्, आध्यात्मिकं ब्रह्म अक्षरम्, आधिदैविकं पुरुषोतमः, सच्चिदानंदरूपाणि। आधिदैविके पुष्टिः, आध्यात्मिके मर्यादा, आधिभौतिके प्रवाहः। श्रीपुरुषोत्तमस्य सृष्टेरिच्छा यदा जायते तदा रविकाश्मीरयोगे यथा वह्निः प्रजायते तथा काला-

ऽक्षराज्जातः सदानंदकटाक्षतः पृथक् भवति । भ्रुवोरंध्रादुत्पद्यते । कालात्प्रकृतिपुरुषौ । प्रकृतेर्गुणात्मको नारायणो लक्ष्मीपतिः । तस्य मनसो विष्णुः । ललाटाद्रुद्रः । नाभिकमलात् ब्रह्मा जातः । ततः सृष्टिः । वृंदावने पुष्टिः । गोकुले मर्यादापुष्टिः । मथुरायां कालयवनदाहपर्यंतं मर्यादापुष्टिः । पश्चात् मर्यादा तथा द्वारकायाम् । अथ वृंदावने एकस्तु आदिरासः अविच्छिन्नोऽस्ति । पश्चात् यस्य रसिकसेवकस्य जीवस्योपरि करुणा स्यात् तथा या गोप्यः कुमारिकास्ताः सर्वा उपनिषद्रूपास्तासामप्यनादित्वम् । व्रजांगनासहगमने मिलितास्तु सामवेदऋचः । नंदस्य गृहे चतुर्व्यूहयुक्तो हरिः । ततो गुरुरासे केवलं श्रीपुरुषोत्तमः । लघुरासे विषण्णा भग्नसंकल्पाश्रितामापुरित्यनेन अनिरुद्धव्यूहो निवारितः । कृत्वा मुखान्यवशुच इत्यनेन संकर्षणव्यूहो निवारितः । कास्त्र्यंगते इत्यनेन प्रद्युम्नव्यूहो निवारितः । केवलं श्रीपुरुषोत्तमेन सह रासक्रीडा । पूतनादिवधे संकर्षणः । द्वारकायां धर्मपालने अनिरुद्धः । द्वारकायां रुक्मिण्यादिषु कामचारे प्रद्युम्नः । राजलीलायां वासुदेवः । गोवर्धनोद्धरणे केवलः । दानलीलायां केवलशरणे प्रवाहः । जपे मर्यादा । आत्मनिवेदने पुष्टिः । कंस-

वधे संकर्षणव्यूहः । कुब्जाकृपायां प्रद्युम्नव्यूहः । श्रीदाममालाकारस्य कृपायामनिरुद्धः। मुचुकुंदस्य कृपायां वासुदेवः। एवं चतुर्व्यूहलीला सर्वत्र। अतो न कुत्रापि केवलः श्रीपुरुषोत्तमः। अथ पूतनादिवधे संकर्षणयुक्तो भगवान्। यमलार्जुनभंगे संकर्षणः। नलकूबरमणिग्रीवप्रसंगेऽनिरुद्धः। तयोरनुग्रहे वासुदेवः। व्रजे सर्वदा श्रीपुरुषोत्तम एव। परंतु यशोदानंदयोः कृपादर्शने चतुर्व्यूहयुक्तः पुरुषोत्तम एव। गोपांगनासु पुष्टिः। गोपीषु मर्यादा। व्रजांगनासु प्रवाहः। अत्र आशंका जाता। या व्रजकुमारिकास्तेन श्रीकृष्णेन सह बद्धजीवा नान्यत्र सांसारिके भर्तर्यपि धृतासवस्तासां मर्यादात्वमुक्तम्। तत्कथ्यते। तत्राह। गोपांगनास्तु भुक्तमुक्ताः भुक्तं गृहे सुखं मुक्तं याभिस्ताः किं वा नाज्ञातो लोकवेदभययुक्तो याभिस्ता भुक्ता कुटुंबमायापत्यवैभवगेहाधिपतिधनवपुःपत्यादिकसकलमर्यादार्था मुक्ता याभिस्ताः सर्वान् धर्मान्निराकृत्य केवलं श्रीपुरुषोत्तममेव भजंति। तस्मात्तासां पुष्टित्वम्। अथ गोपीनां व्रजकुमारीणां गोपीजनवल्लभभजनेतरभजनं जातम्। किं च तद्भजनोपायेऽपि कात्यायनीभजनं कृतम्। तस्मात्तासाम् अनन्यव्रतं विनष्टम्। अत एव तासां

मर्यादा भक्तिः। दर्शनमपि चतुर्व्यूहयुक्तस्य श्रीकृष्णस्य पुरुषोत्तमस्य। तथा व्रजांगनानां मातृभावेनैव संग्रहः। तासाम् ईश्वरे पुत्रभावो वर्तते। तस्मात्तासां प्रवाहत्वम्। इति त्रिविधा गोप्यः। अथ वसुदेवस्य पूर्वं मर्यादापुष्टिस्वरूपं दर्शितम्। तस्मादादौ चतुर्भुजस्वरूपं दर्शितम्। जन्मस्थाने पुष्टिरहितं वासुदेवव्यूहं दर्शयितुं चतुर्भुजस्वरूपं दर्शितम् तदा विस्मयो जातः वसुदेवस्य कचित् ननु–यदा स्वरूपं मया पूर्वं समाधिना दृष्टं तदिदं नेति तदा भृत्यार्तिहरत्वात् दयालुत्वात् श्रीपुरुषोत्तमेन अविच्छिन्नरासे क्रीडता भगवता स्वांशस्तत्रतत्र नियोजितः। ततो बभूव प्राकृतः शिशुः। पश्चाद्दधिकर्दमलीलायां स्वांशावेश एव सर्वो वा–अरिष्टे गोगणे कुंजे वटे गोवर्धने तथा व्रजे वृंदावने चैव पुष्टिस्वरूपं यदस्ति। स पूर्णस्तु सर्वदा। अथ नंदस्य गृहे मर्यादापुष्टिस्वरूपं यदस्ति तस्य स्वरूपं वर्ण्यते। तच्च अष्टावरणसंयुतं भवति। आवरणानि–पृथ्वी, आपः, तेजः वायुः, आकाशं, महत्तत्त्वम्, अहंकारः, प्रकृतिः। इत्यष्टावरणानि अष्टाभिः सह मुकुंदोऽष्टावरणयुक्तचतुर्व्यूहसंयुक्तोऽस्ति अथ नारायणेन यद्भवति तत्कथ्यते। श्रीनारायणो गोदेवभक्तसाधूनामनुग्रहार्थं चतुर्धा

भवति। वैकुंठस्तु भगवान् अंशादिचतुर्भेदान् भक्तानामनुग्रहार्थं करोति। अंशः, कलाः, आवेशा, इति नृसिंहरामवासुदेवा एव त्रयः अंशावतारा:। मत्स्यकूर्मवराहा एते त्रयःकलावतारा:। वामनो बुद्धः कल्की एते त्रय आवेशावतारा: अन्ये नारदादयो विभूतयः संति। एता ईश्वरस्य विभूतयः।

इति श्रीवल्लभाचार्यविरचिता भगवत्पीठिका संपूर्णा।

## अथ भा० सुबोधिनीप्रथमस्कंधकारिका:।

श्रीकृष्णाय नमः।

वंदे श्रीकृष्णदेवं सुरनरकभिदं वेदवेदांतवेद्यं,
लोके भक्तिप्रसिद्ध्यै यदुकुलजलधौ
प्रादुरासीदपारः।
यस्याऽऽसीद्रूपमेव त्रिभुवनतरणे
भक्तिवच्च स्वतंत्रं,
शास्त्रं रूपं च लोके प्रकटयति मुदा,
यः स नो भूतिहेतुः ॥ १ ॥
कर्ता ज्ञः सकलस्य यो निगमभूः
सर्वस्वरूपोऽपि सन्।
सर्वस्याऽपि विधारणो विजयते
निर्दोष सर्वेष्टदः ॥